VANALAYA

R
S
V
L
2595

015, IN97,
N55

ॐ


शिवाभ्यां नमः ।

॥ वनलता ॥

VANALATA

BY

V. MAHALINGA SASTRI, M. A., B. L.



SAHITYA CHANDRASALA,
TIRUVALANGADU, (Tanjore Dist.)

SRINIVASA PRESS, THIRUVAIYARU.

January 1955.

All rights Reserved]

[Price Re. 1—0—0

FOREWORD.

Sri Y. Mahalinga Sastri needs no introduction to lovers of Sanskrit in South India. He has already to his credit a good number of poetic compositions in Sanskrit which have won the appreciation of discerning scholars. *Vanalata* which is now published is sure to find a hearty welcome from those who delight in reading modern poetry composed in Sanskrit.

The story underlying the poem is, to use a technical expression, a romance. A Yaksha occupying a high position in the service of Kubera forgets a duty assigned to him by his master owing to the preoccupation of his passionate love for his wife. Kubera is incensed at this and curses him and his wife. She is transformed into a creeper in a forest (वनलता) and he leaves his mansion in Alaka to take his birth as a prince on the earth. Once, the prince on horse back enters into a forest and feels he is being impelled to go forward as if to meet something destined for him. It is evening, the sun is setting and darkness is slowly casting its shadows over the forest. Then the moon rises. The serene solitude in which he finds himself inclines his spirit to solemn devotion. In this mood he sings a hymn in praise of Siva. This leads to the loosening of the effect of the curse. He then sees a lovely creeper full of beautiful flowers and prompted by some influence over which he has no control, he embraces the creeper and is astonished to see a charming young woman emerging out of it. His memory still continues to be under the spell of the curse; he does not know who she is, but is irresistibly drawn to her by her loveliness. As he is about to approach her, she disappears from his sight. He is bewildered and bursts out into love-stricken laments and entreaties. Moved by these passionate tokens of genuine love, the lady appears again before him and explains to him how the curse had changed them out of all recognition and how,

at her prayer, Kubera had granted her request that the curse should have an end. The prince's hymn to Siva was the expiation that brought about their reunion. At this moment a messenger of Kubera approaches them with the glad news that the Yaksha is restored to his old place. He and his beloved go back to their mansion in Alaka.

Readers of Kalidasa would easily recognise that the author has taken a hint from *Meghasandesa* and another from *Vikramorvasiya* to weave the narrative of his romance. From this it should not be thought that the poem is a mere imitation of these two classics. In spite of the suggestions taken from them, *Vanalata* is as original in its treatment as original can be.

The first *sarga* or canto which describes dusk passing into dense darkness and the moon slowly rising and dispelling that darkness is in the metre called द्रुतविलम्बितम्. It shows a realistic and vivid description of natural scenes and arrests the attention of the reader by its freedom from convention. First the bees leave the lotuses which were closing; then rise from the ponds hosts of wild boars; buffaloes come out of them later and later still elephants are seen moving about. The spread of darkness is in a way symbolised by these.

As the darkness becomes dense, the monkeys in the forest feel drowsy and open and close their eyes before going to sleep. The cows low in response to the cries of their calves and the birds fly to their nests cawing and cooing.

The moon is rising and with his rays touches the nymph of the night but she does not respond to the loving touch of her lover as if angry at his delay in coming.

The moon's rays spreading on the expanse of the sky seemed to clear the streets, as it were, of the dust of darkness before their master came on.

The second canto is in the metre वसन्ततिलक and consists of the hymn sung by the prince to Siva. The Lord is gracious and full of love and compassion to those who are devoted to Him; but, to the wicked, He shows no mercy and destroys them as He did the demons in Tripura. Other gods pride themselves on their power to grant *Mukthi* but Siva alone could save a Markandeya when Death threatened him. So His devotees alone never fear death. Siva rides on the bull of *Dharma* and wears the sacred ashes of prosperity on his limbs; He has under His control the six internal enemies (of man) lust, anger and the like, in the form of serpents; on His head He wears the moon of wisdom or true knowledge and at the end of *the Yugas*, He dances on the cremation ground into which the earth has been transformed.

Siva is terrific as the destroyer and puts down the overweening pride of man when he complacently thinks that he can erect and create magnificent things. When the earth is made to quake, man's mansions fall and crumble to dust and crowds of people cry out in despair. When mighty floods surge owing to excess of rain, the works of man meet with wide-spread devastation. When fires break out in the country and on the hills, man is terror-struck and learns that he might at any moment be consumed by them. Only then does he realise his insignificance and impotence.

The author has availed himself of the Yaksha's hymn to express his own deep devotion to Siva and the *slokas* have therefore the ring of sincerity.

The third canto is mostly narrative and relates the story of the prince proceeding towards the creeper. The metre chosen is apt enough for the narration, being उपजाति.

The fourth canto is, on the other hand, lyrical throughout and represents the grief of the prince, when the lady disappears from him with the intention of testing his love.

"Love in Separation" or विप्रलम्भशृङ्गार is considered the most poetic and delightful of *rasas* and the author displays his skill in this canto in the representation of the emotions of a lover when afflicted by separation from his beloved. The author has rightly chosen वियोगिनी as the metre best suited for the purpose. The prince laments, what he calls, the cruelty of the lady in the following words:-

"Is it because, as a creeper, you were long in contact with a tree that your heart has become indifferent and cruel to me"? "When my heart was pierced by missiles on the battle-field, I did not feel the pain very much; but now struck by the arrows of *Manmatha*, I feel an insufferable and burning sensation in it, which can be cured only by you".

"Without you the forest scene appears desolate and void, as if the beasts, the birds and the flowers have all vanished into nothing. It is now brought home to me that the words which describe the world as an illusion are nothing but truth".

He entreats her most piteously to be so gracious as to appear again before him. "The forest now is a scene of solitude; the night is pleasant and agreeable owing to moonlight, the breeze from the Malaya Hills is fragrant and cool. Here am I at your service; why don't you bid me do what you want ?"

"If only you should permit me once to kiss your lips, I should not care in the least even for all the pleasures of Svarga earned by good actions in the past".

We are then told how the lady entreated so passionately appeared again before her lover. She relates the incidents of the past, how they were cursed by their master into fogetfulness of their celestial lives, how she was transformed into a creeper and how at her request Kubera fixed a limit for the operation of the curse and how, by the hymn sung to Siva, the deliverance had been brought about.

The fifth canto is, for the greater part, narrative and is in रथोद्धता except the last three slokas describing the lovers' reunion and their restoration to the favour of Kubera, and they are respectively in मालिनी, शार्दूलविक्रीडितम् and मन्दाक्रान्ता.

It was said at the beginning that the poem is a narrative. From what has been shown of it, the reader would see that the narrative is a frame-work, as it were, for the descriptions and the representation of human emotions which occupy a prominent part in it.

वनलता reveals, what was already known to readers of Mr. Mahalinga Sastri's poems, his perfect mastery of Sanskrit prosody in handling difficult metres.

The style and diction of the poem are characterised by ease, lucidity and occasional assonance. In conclusion I may be permitted to state that वनलता will afford its readers several hours of delightful entertainment and that no lover of Sanskrit should miss its perusal.

Kumbakonam
20—1—55

M. R. Rajagopalan,
(Retired Professor of English.)
Madras Educational Service.

PREFACE.

Of *Vanalata* I should say that it came to me like a lovely dream from a forgotten realm of romance. The atmosphere of the theme itself is replete with shut-out memories. The hero of the poem at the very outset reflects upon a subconscious "unremembered" reminiscence with nostalgic sadness;

किमपि नष्टमिव स्मरतः पदं
विमुग्धतां भजतो नृपसंपदि ।
सततमुत्सुकिनो मम चाथवा
सदृशमेव विधिर्विदधे न किम् ॥

This verse was undoubtedly inspired by Kalidasa's —

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥

Not only the verse किमपि नष्टमिव was inspired by रम्याणि वीक्ष्य but the poem वनलता itself was inspired by my first acquaintance with the works of Kalidasa, and it may be truly said that "upon my imbibing the beautiful ideas and listening to the sweet verbal music of Kalidasa, I turned away from external sources of happiness and began to yearn inwardly towards an indifinable bliss which I subconsciously felt I once possessed but laterly lost".

The plays of Kalidasa and his lyric poem *Meghasandesa* besides the *Nalacharitra* and the other works of Sri Nilakantha Dikshita were mainly responsible for opening the sluices of a mysterious floodgate of past memories in me when I was on the verge of the 'teens and for releasing the torrents of poetry. 1) कुवलयाञ्जलिः 2) वृन्दावनाष्टकम् 3) सन्ध्याकौतुकम् 4) भारती-विषादम् 5) डिम्भसंबोधनम् 6) भावनिष्यन्दः 7) छायाप्रतिकृतिः 8) राघवविलापः and others along with the वनलता constituted my earliest effusions of poetry.

On finishing the वनलता I acknowledged my indebtedness to the two great poets above mentioned in the following verse

श्रीकालिदास एकः श्रीमानपरः स नीलकण्ठमखी ।
देव्या गिरामपाङ्गौ द्वावेतौ भुवि समुल्लसतः ॥

I almost had said मयि समुल्लसतः ।

The first draft of the *Vanalata* was made in 1916—17 when I was in the senior B. A. class. The third, fourth and the fifth cantos have been least interfered with in the later revisions of the poem, except for the fact that the fourth was slightly added to and rearranged in 1926 and number 2 of the fifth canto was added in 1927.

The second canto was enlarged and in some parts rewritten in 1924. The first canto was originally written in the औपच्छन्दसिक metre and it was rewritten in 1918 or there-abouts in the द्रुतविलम्बित metre and it was given its final form in 1920.

In 1917 the poem had 106 verses only. In 1920 or so it had 126 verses. When its final transcription was made in 1927, it was 141 verses strong.

In 1918 I had shown this poem to some of my friends and in or about the year 1920 I read out portions of it to His Holiness the Jagadguru Sri Sankaracharya Swamigal of the Kanchi Mutt, while He was camping for a *chaturmasya* at Mayuram.

In 1928 August I added the post-colophon verse इह कौतुकिनीं. In the same year Mahamahopadhyaya Professor S. Kuppuswami Sastrigal was kind enough to go through the whole poem at my request.

The *Vanalata* was published through the Udyana Patrika as a serial during the years 1953 and 1954 at the rate of four pages every alternate month.

It is very kind of Professor M. R. Rajagopala Aiyangar to have furnished this poem with a critical introduction. He was my revered father's life-long friend and my own teacher in the Presidency College. He has been keenly interesting himself in my writings and publications. His words of commendation are really blessings to me.

I have prepared an English translation of the poem in a kind of free verse, for attracting the attention of a wider reading public, but I reserve its publication to a more propitious future date.

Tiruvalangadu
12—1—55

V. Mahalinga Sastri.


श्रीरस्तु ।

शिवाभ्यां नमः ।

अथ

वनलता ॥

श्रीमन्महालिंगकविविरचितं खण्डकाव्यम् ।



प्रथमः सर्गः ।

अथ गभस्तिमति श्रितपश्चिमे पतदहर्द्रुमपक्वफलत्विषि ।
वनमगाहत कोऽप्यनुभाववान् निरनुगस्तुरगेण सवाहनः ॥ १ ॥

अवशविश्रथरश्मिरतिश्रमालसतुरंगम एष वने भ्रमन् ।
अधिययौ रविणा सह मन्दतां महसि चौजसि चङ्क्रमणे तथा ॥ २ ॥

अवसितस्वनियोगमिलातले निहितकालविभागधुरं निशि ।
रुचिपतिं विनिवृत्तिकृतोद्यमं स चिरमाकलयद्दृढमुत्सुकः ॥ ३ ॥

मुकुलितारुणकान्ति नभःस्थलं परिविकीर्णतमःकलिकं तदा ।
अनुबभौ दरसंकुचदम्बुजां कमलिनीमलिनीमलिनीकृताम् ॥ ४ ॥

शिशिरपल्वलकर्दमरूषितानमितघर्घरितेन समुद्गतान् ।
वनवराहगणान् तिमिरोद्गमानिव ददर्श स सान्ध्यमहःप्लुतान् ॥ ५ ॥

पयसि माहिषमार्द्रकलेवरं करटियूथमुदारमदाविलम् ।
निविडतामनयद्विरलं तमः क्वचन वर्त्मनि तस्य हि पश्यतः ॥ ६ ॥

अलिकुलानि वराहकदम्बकं महिषवृन्दमिभा इति हि क्रमात् ।
प्रतिकलं गरिमाणमुपेयुषां ययुरमी तमसामुपमाऽर्हताम् ॥ ७ ॥

विवृतसंवृतपक्ष्मपुटं मुहुः कपिकुलं तमसि क्रमवर्द्धिनि।
नयनयोरभिभूतिमनुक्षणं समवधारयदाहितविक्रियम् ॥ ८ ॥

वियुतवत्सरुतप्रतिभापिभिर्विकलहुम्भरवेण गवां कुलैः।
खगगणैश्च विराविभिराकुलं वनमकारि निशागमकातरैः ॥ ९ ॥

अखिलसत्त्वमकर्कशवृत्ति यन्निजनिजावसथं तदगाहत।
अपयति द्युमणौ परपीडना हरितरक्षुमुखास्तु निरागमन् ॥ १० ॥

उरगफूत्कृतिभिर्गुरु निश्वसन्त्यवकिरन्त्यभितस्तिमिरालकान्।
हृदयतापवती वनभूर्दवैरपि रुरोद शिवाविरुतैस्तदा ॥ ११ ॥

इह वने क्षणदाऽऽगमभीषणे नियतिलंभितसंभ्रमणव्रतः।
अनधिगत्य विधेयमथोचितं स इति विह्वलतामगमद्युवा ॥ १२ ॥

कमलशङ्खनिभं खगयोर्युगं समनुकृष्ट इवानुसरंश्चिरम्।
अनुगमण्डलमन्तरयन् बहु स्वयमगाहिपि दिग्भ्रमदुर्गतिम् ॥ १३ ॥

इह तमः प्रसरत् परिवर्धते मम शुचा गतिमप्रतिबोधतः।
द्वयमिदं ह्यविभाव्यमितः पुरो विपिनवर्त्म च भावि च यन्मम ॥ १४ ॥

किमपि मामपकृष्य विदूरतो विहगयुग्ममगाद्यददृश्यताम्।
परिणतिं मम कामपि धास्यतो विलसितं नियमेन विधेरिदम् ॥ १५ ॥

करिघटापटुफीट्कृतिभीषणे सततविद्रुतसत्त्वसमाकुले।
विधिरहो कठिनः किमकल्पयन्मम निशावसतिं विपिनोदरे ॥ १६ ॥

किमपि नष्टमिव स्मरतः पदं विमुखतां भजतो नृपसम्पदः।
सततमुत्सुकिनोऽपि ममाथवा सदृशमेव न किं विदधे विधिः ॥ १७ ॥

पुरुषकारपरा भुजसम्भवा न खलु कृच्छ्रगता दधते शुचम्।
यदि पुनर्न भजे विषयं निजं विपिनराज्यमखण्डितमत्र मे ॥ १८ ॥

इति विभाव्य विसृज्य तुरङ्गमं श्रमपरिश्लथगात्रमतो नयन्।
क्रमहरां क्वचिदेत्य नदीं शुभां तृणजलाश्वसितं तमसौ व्यधात् ॥ १९ ॥

अथ झरीमदविस्रवणं गिरिं गजमिवानतजानुकमेत्य सः।
घनवनीकुथसंवृतमाश्रयल्लघु विलङ्घयितुं महतीं निशाम् ॥ २० ॥

उपहृतार्घ्यफलाः फलशाखिनः परभृतोक्तिमिषेण तमाह्वयन्।
तरुतलेऽस्य ततः कृतसुस्थितेः सुरभयो मरुतः सुखमावहन् ॥ २१ ॥

परिणते क्रमशोऽथ निशामुखे प्रसरदन्धतमिस्रनिमज्जितः।
न स विवेद वहन्तमनेहसं विविधयाऽपहृतो हृदि चिन्तया ॥ २२ ॥

स्फुरति तत्र तमोविपिनाद्वयेऽप्युदयशैलनितम्बविसर्पिणीः।
कतिचनापि रुचः परिधूसरा यदि चकोरकुलान्याभिजज्ञिरे ॥ २३ ॥

विचरतः कलभान् विजिहीर्षया कुमुदिनीरपि च प्रतिबोधिनीः।
अदलितेऽपि तमस्यधिजग्मिवान् स मरुता कटुना च सुगन्धिना ॥ २४ ॥

तदनु पूर्वदिशि क्षणदाकरः तिमिरमस्य च शोकभरं हरन्।
विशदयन् हरितो विकिरन् सुधां नयनयोरुदियाय जगन्मुदे ॥ २५ ॥

उपरि दीप्तमधस्तमसावृतं शशिन ऊर्ध्वमुखैः प्रथमांशुभिः।
भुवनकोशमगात् सरसस्तुलां पतितपङ्कभरस्य शुभाम्भसः ॥ २६ ॥

उदयमिच्छति राजनि सेवया पुरत एव तदीयमरीचयः।
तिमिरपङ्किलपुष्करवीथिकां सलिलवत्प्रसृताः किमशोधयन् ॥ २७ ॥

चिरविलम्बित इत्यतिसंभृतान्तरतमः कलुषा स्पृशतः करैः।
न सहसा प्रससाद निशा विधोर्गहनसंवरणस्थिरसाहसा॥ २८॥

गिरिगुहामविशन्यदि कौशिकाः सदृशमेतदमी हि तमोरताः।
अमृतरोचिषि दीव्यति मुद्रणां कमलिनी सुभगापि कथं दधौ॥ २९॥

भ्रमदथाकुलमम्बुरुहामुपर्यनतिदीर्घरवं भ्रमरीकुलम्।
कुमुदिनीं शनकैः प्रतिबोधिनीं सुरभिनिःश्वसितां समुपासदत्॥ ३०॥

गिरिपु निर्झरिणी कुसुमावलिर्नवपलाशचयान्तरपुञ्जिता।
तुहिनवृष्टिभरः कमलाकरे विपिनसीम्नि समैधत चन्द्रिका॥ ३१॥

व्रततिपाशधिया चरणेष्विभा विदुधुवुश्च्छदसन्धिविलम्बिनः।
विसलताचपला कलहंसिका परिचकर्ष करांस्तुहिनद्युतेः॥ ३२॥

चमरवालमृणालमरालिकाकुमुदकुन्दकुशेशयकैतवात्।
वनभुवो वसुसंपदमैन्दवीमभिमतामभिसंजगृहुर्नु किम्॥ ३३॥

विपिनराजिजटासु महीभृतः प्रसृतचान्द्ररुचो विशदप्रभाः।
जलदकृत्तिधराः कटकेष्वथो ददृशिरे गिरिशप्रतिमा दिशि॥ ३४॥

कुमुदिनी मुमुदे जहृषुस्तदा मधुलिहः पुलिनानि चकाशिरे।
परितुतोष चकोरपरंपरा स च युवा हृदि कौतुमानशे॥ ३५॥

अथ स वन्दितुमिन्दुवतंसकं स्तुतिसुमाञ्जलिमित्थमुपाददे।
सुभगदर्शनतो विजने मनस्सुलभसात्विकवृत्ति हि विज्वरम्॥ ३६॥

इति वनलतायां प्रथमः सर्गः।

अथ द्वितीयः सर्गः ।

प्रत्यश्मखण्डमनुपादपमाहितस्व-
सान्निध्यमीश जनिभन्निखिलात्मरूपम् ।
अक्षय्यमाद्यमिह मे स्तुवतो भवन्तं
न स्यादरण्यरुदितेऽप्यपवादलेशः ॥ १ ॥

व्योमापगापरिगतेन्दुकलावतंसा
ताराकरोटिविकटाभरणाऽम्बरश्रीः ।
आपिञ्जराभ्रजटिलेयमधः कृताद्रि-
कृत्तिः समक्षमिव दर्शयति प्रभो त्वाम् ॥ २ ॥

सन्ध्योपबृंहितबलानसुरान् विमोह्य
त्रातुं जगन्ति कृततांडवमद्य मन्ये ।
त्वामौपवाह्यविकटक्रमकातराङ्ग्या
देव्योपगूहिततनुं विनिवर्तमानम् ॥ ३ ॥

घण्टारवैरपनयन्तममङ्गलानि
देवीसखः समधिरुह्य वृषाधिराजम् ।
कुर्वन् विभो त्रिभुवनाभयदानदक्षे
पाणौ पिनाकमनुपालय मामुपेत्य ॥ ४ ॥

भूतेश भूतगणभीषणसंप्रचारे
मत्तेभकृत्तिविनादिनि कृत्तिवासः ।
आशीविषैरपि च कुण्डलिमण्डन त्वां
जुष्टे वने निपतितः शरणं प्रपद्ये ॥ ५ ॥

दैत्याः पुरत्रितयरूपभृतो जगन्ति
निष्पिष्य ये किल निजासिकया विचेरुः ।

तान् भस्मदाहमपि दग्धवतः स्मरामि
नम्रेषु शीतलतमस्य तव स्मितस्य ॥ ६ ॥

मन्ये पुरा सपदि निष्पतितं निगीर्य
काकोलमुद्भटविषानलदुष्प्रसह्यम्।
यन्मङ्गलं त्रिजगतामकरोस्त्वमीश
तेनाच्युतस्य निरवग्रहमद्य कर्म ॥ ७ ॥

दुर्वर्णमारचयितुस्त्वदुपाश्रितानां
छिन्द्याः शिरोऽपि कुपितो द्रुहिणस्य शम्भो।
त्वत्पादसेवननिरन्तरभक्तिभाजः
प्राप्तं न मृत्युमपि किं व्यपनुद्य रक्षेः ॥ ८ ॥

धर्मं वृषं समधिरुह्य विभूतिभूति-
मङ्गेषु बिभ्रदुरगान् षडरीन् निगृह्णन्।
आबद्धबोधशिशिरांशुकलो युगान्ते
शिष्टः प्रणृत्यति भवान् जगतीश्मशाने ॥ ९ ॥

यासां न मूलमवधारयितुं क्षमन्ते
मर्त्याश्चिरन्तनगिरः किल ताः समस्ताः।
त्वामामनन्ति सुचिरन्तनमादिमूल-
मप्राप्यमूलमपि कस्य भवान् प्रमेयः ॥ १० ॥

गोत्रासमुद्वहनसंस्तुपाटवेन
रूपेण कोऽपि तव मूलविनिश्चयाय।
आलम्ब्य पक्षबलमप्यपरो विवेक्तु-
मुच्छ्रायमुद्यममयन् न विसिष्मिये किम् ॥ ११ ॥

मुक्तिप्रदोऽहमिति गाढमहंयवोपि
यामापदं न खलु वारयितुं समर्थाः।

साक्षी मृकण्डुतनयस्तव कालकाल
तस्या विभेति न जनो भजनानुरक्तः ॥ १२ ॥

सृष्ट्वा स्वमूर्तिकलया चरणाङ्गदेना-
वष्टभ्य भूमिमथ नैजविलोचनाभ्याम् ।
रात्रिंदिवं प्रकटदीप्तिमतीं विधाय
गङ्गाम्बुपावितजनामवसि प्रभो त्वम् ॥ १३ ॥

जानन्ति ये न तव वैभवमाप्तवाग्भि-
स्तद्ज्ञापनार्थमुपदर्शयसि प्रभो त्वम् ।
अष्टासु मूर्त्तिषु हि कामपि जातकोपां
क्षुब्धः प्रताम्यति यतो निखिलोऽपि लोकः ॥ १४ ॥

भूकम्पनेन सहसा परिचूर्णितासु
दक्षासु मर्त्यरचनासु समन्ततोऽपि ।
हाहेति भूरि परितापकृशो जनोऽयं
कर्ता किलाहमिति मानमपाकरोति ॥ १५ ॥

विद्धयण्डमण्डलविभेदिनि तोयभारे
विप्लावयत्यखिलमूर्मिकरैर्गृहीतः ।
व्याघूर्णितो भ्रमिषु गौरवतो विपन्न-
स्ताम्यन्नतीव तृणलाघमात्मनीष्टे ॥ १६ ॥ व्याप्त

ग्रामानलैर्ज्वलनवर्षिभिरद्रिकूटै-
र्दीवैश्च नैकविधहेतुभवैस्तथान्यैः ।
ग्रस्तः कृशानुभिरसौ परिपच्यमानो
वेत्ति स्वकायमुपलालितमिन्धनार्हम् ॥ १७ ॥

रुद्रस्य ते भवति कोपदशा यदा तु
मायात्मनश्शमयितुं भुवनस्य भारम् ।

कामार्तिलोभभयमोहविकारभाजो
घोरं मिथो विशसनाय जनास्त्वरन्ते ॥ १८ ॥

रम्यं किलैतदविकारि दृढं किलैत-
त्सुश्लिष्टमेतदिदमप्यविनाशि सुस्थम्।
एवं समुच्छ्रितमनोरथहर्म्यकूटा-
न्नः कालरूप हससि त्वमपास्य सद्यः ॥ १९ ॥

क्रुद्धे त्वयि प्रलयमेव जगन्ति यान्ति
सङ्कल्पतस्तव भवन्ति पुनर्नवानि।
वार्तेयमित्थमिदमित्यनपायिनी तु
लोकेषु नाथ चलति त्वयि सानुकम्पे ॥ २० ॥

भूतोयवह्निगगनानिलचन्द्रसूर्य-
होतृप्रकारतनुभेदमुपेयिवांस्त्वम्।
प्रत्यक्षितोऽसि विदितोऽप्यसि तर्कजालै-
र्मूढो न वेत्ति शिरसि प्रहतो न यावत् ॥ २१ ॥

सर्वज्ञ सर्वचर सर्वजगत्स्वरूप
सर्वातिरिक्त निरवग्रह सर्वशक्ते।
सर्वक्रिय प्रभव सर्वचराचरस्य
त्वां कूपदर्दुरनिभाः क्व वयं विवेक्तुम् ॥ २२ ॥

सर्गस्थितिप्रलयचक्रनिबाहकाय
कालात्मने निरवकाशविकासभाजे।
मूलाय मूलरहिताय नमः परस्मै
नित्याय पूर्णमहसे निखिलाय तुभ्यम् ॥ २३ ॥

इति वनलतायां द्वितीयस्सर्गः।

015/M91,1
N55

SRIYA SANSKRIT VIDYA PEETHA, TIRUPATI. LIBRARY.

अथ तृतीयः सर्गः ।

अथाष्टमूर्तेरुपहारमाल्यादिव प्रसन्नस्य मरुत्प्रणीतः ।
अधिन्यधाद्विस्मयमन्यभावमाच्छिद्य तच्चेतसि कोऽपि गन्धः ॥ १ ॥

व्यापारिता दृष्टिरमुष्य पार्श्वे सप्रच्छदस्कन्धतले ललन्त्या ।
कयापि वल्या जगृहे प्रसूनैः सन्नद्धतारुण्यविकासभाजा ॥ २ ॥

उद्भूतलावण्यतया मनोज्ञां सचेतनां भावयुतामिवैनाम् ।
मत्ताङ्गनामानहरां विलासैर्निध्यायतोऽस्य प्रससार चिन्ता ॥ ३ ॥

चलप्रवालाङ्गुलिमानताग्रां समन्दहासामिव फुल्लपुष्पैः ।
अवैमि सत्कारविधेः कृतेऽमुमुपस्थितां काननराज्यलक्ष्मीम् ॥ ४ ॥

न सन्निवेशैर्भवतीह तत्तदङ्गोचितव्यक्तिरथापि चैनाम् ।
रागेण कण्ठग्रहकांक्षिणीं मे चेतः समाख्याति रहः प्रहृष्टम् ॥ ५ ॥

अस्याः प्रसूनस्तबकानताङ्ग्याः प्रान्तैर्विलोलैरिव वारयन्त्याः ।
लोलः प्रवालाधरमापिबन्मां प्रकोपयत्युन्मद एष भृङ्गः ॥ ६ ॥

नूनं तिरश्चामपि चित्तमार्द्रमस्यां किलासेचनदर्शनायाम् ।
सप्रच्छदेष्वेकरसा मदान्धा नैनां प्रधर्षन्ति यतो द्विपेन्द्राः ॥ ७ ॥

इयं प्रसार्योभयतोऽपि बाहू स्कन्धप्रदेशे तरुनायकस्य ।
तेन प्रवालाङ्गुलिमृश्यमाना म्लानेव रत्या प्रमदा विभाति ॥ ८ ॥

वैरस्यभावं वनितासु बध्नन्नमर्षणीयो न्वभवं स्मरस्य ।
अभोग्यया केवलयापि वल्या येनाशयो मे क्षुभितः क्षणेन ॥ ९ ॥

नितम्बिनीं प्रत्यनुरज्यतो मे यां कांचिदन्यामपि निर्वृतिः स्यात्।
लतापरीरंभणलोलुपस्य हास्यो ममाधिर्विषमो विपाके ॥ १० ॥

उत्कण्ठते दर्शनमात्रतोऽपि यदन्तरङ्गं मम वीरुधोऽस्याः।
अनेन जन्मान्तरसंगतानि संस्कारलग्नानि किमु स्मरामि ॥ ११ ॥

उत्सृज्य नेत्रे प्रणयादपांगपातो विहायाधरमेव हासः।
विना स्तनद्वन्द्वमनङ्गरागस्तेनान्वभावीति विमृश्य तस्याः ॥ १२ ॥

औत्सुक्यतस्तन्मयतां प्रपन्नः स चेतनाचेतननिर्विमर्शः।
भृङ्गोपरोधेन कदर्थितां तां प्रभूतवातक्षुभितामपश्यत् ॥ १३ ॥

सद्योऽनयोर्दुर्विनयेऽप्यमर्षी जातावमर्षः किल वेपमानाम्।
आश्वासयंस्तामभिसंपपात समालिलिङ्गापि निमीलिताक्षः ॥ १४ ॥

अथान्तरङ्गे रभसेन मुक्ते स्पर्शेन नूत्नेन स हृष्टरोमा।
अपश्यदुन्मील्य दृशौ विशाले रूपोत्तरां कामपि कण्ठलग्नाम् ॥ १५ ॥

मेघान्तराद्विद्युदिव स्फुरन्ती निर्मुच्य बाहुग्रहमस्य वेगात्।
अपेयुषी सा तरलायताक्षी तस्थाविवान्तर्विचिकित्समाना ॥ १६ ॥

ततः प्रकीर्णाश्रु विमृज्य नेत्रे तं विस्मयेनाकृतकेन मूकम्।
वृत्तावबोधाक्षममीक्षमाणा वाञ्छामबध्नात् परिहासकेल्याम् ॥ १७ ॥

नाट्येन लग्नान्ततीषु केशानुन्मुच्य भीतेव शनैश्चचार।
पदे पदे शिञ्जितनूपुरेण नितान्तरम्येण गतेन बाला ॥ १८ ॥

तामक्षमो हातुमुपोढमारः स वाचमूचे विवशोऽनुधावन्।
छायाभिनीलद्रुममण्डलीषु मेघान्तरालक्ष्यतडिद्विलोलाम् ॥ १९ ॥

प्रसीद विष्ठ क्षणमत्र तन्वि वृत्तेन ते विह्वलिताय मह्यम्।
अक्ष्णोश्चिराज्ज्याड्यमपैतु तन्मे द्विचन्द्रमेतच्च वनं चकास्तु ॥ २० ॥

शृङ्गारलक्ष्मीरिव सञ्चरन्ती पताकिकेव स्मरनायकस्य।
कथं पुरो मे चकिता प्रधावस्यहो कथं ते प्रभवो लतायाम् ॥ २१ ॥

अवेहि मां धर्मधुरां वहन्तमापन्नरक्षाव्रतबद्धदीक्षम्।
अज्ञातभावां न किलानुरुन्ध्यां सुश्रोणि वाचं शृणु मे शुभार्थाम् ॥२२॥

सञ्चारखेदं यदि मत्कृते त्वं वने वहस्युद्धतकण्टकेऽस्मिन्।
वामे निवृत्तोऽस्मि निशामयाद्य कृतं प्रयासेन विविक्तमास्स्व ॥ २३ ॥

आवेदितैवं दृढनिश्चयेन सा भामिनी बालकुरङ्गनेत्रा।
कण्ठेन गत्या जितनीलकण्ठा किंचित्परावर्तत सम्भ्रमेण ॥ २४ ॥

एतावता च्छद्मवदानतेन निगूढदेहं सविधद्रुमेण।
साऽभ्यूह्य भावं प्रविचेतुमस्य निजप्रभावेण तिरोबभूव ॥ २५ ॥

अथाभिपत्य प्रमदां कुमारः परोक्षितां वीक्ष्य मुखेन मम्लौ।
स्वर्गश्रियं स्वप्नदशासु दृष्टनष्टामिवामन्यत तामतीताम् ॥ २६ ॥

स्फुरन्निशानाथमयूखहृष्टा वनस्थली पुष्कलपुष्पशोभा।
न तं नदन्निर्झरिणीप्रषत्का तदा धिनोति स्म मनोजतप्तम् ॥ २७ ॥

स शेवधिं लीनमिव क्षणेन द्रुतं तपोभाण्डमिव प्रमादात्।
अनुग्रहं क्षीणमिवेश्वराणां शुशोच कान्तामणिमाशु नष्टम् ॥ २८ ॥

रथाङ्गनामेव स पार्श्वलग्नां प्रियामबोधन्विललाप कामी।
मोघीकृतप्रार्थननिस्सुखानामाधिर्विलापैर्हि लघुत्वमेति ॥ २९ ॥

इति वनलतायां तृतीयस्सर्गः।

अथ चतुर्थः सर्गः।

मारादु अयि दुर्ललिते किमेवमेनं वशितं वञ्चयसि प्रलोभ्य सद्यः।
त्वयि दृष्टिपथात्परागतायां प्रगुणं मां कुसुमायुधः क्षिणोति॥ १॥

न विभाति वनं त्वया वियुक्तं सपदि म्लानमृगद्विजप्रसूनम्।
ननु शून्यमिति प्रपंचलक्ष्यं वचनं मेऽनुभवेऽद्य दृष्टतत्त्वम्॥ २॥

कुतुकाल्लतिकात्वमास्थिता किं भवसि त्वं वनदेवतासु कापि।
विधुता मम संभ्रमप्रकारैस्सपदि क्रोधतिरोहितस्वमूर्त्तिः॥ ३॥

अथवा प्रभवत्सु जातमन्तुस्समुपेत्यानुशयव्रतं त्वमित्थम्।
अवशादपकल्मषा भवन्ती द्रुतमत्येपि निजं पदं स्मरन्ती॥ ४॥

वनवर्त्मनि दुस्तरे विधात्रा न तथा पातयता ममापराद्धम्।
उपदर्श्य मनाङ्मनो हरन्तीं नयता त्वामसमक्षतां यथा मे॥ ५॥

तमसि क्षणदृष्टसंप्रलीनां तडितं मेघ इव स्मरन्विरौमि।
स्मर मे स्मरकातरस्य चण्डि स्मृतिशेषं न च यावदम्युपैमि॥ ६॥

नियमेन तिरोहितान्तरङ्गं मम लोलाक्षि परीक्षसेऽप्रमत्ता।
करुणापगमो न शङ्कनीयः कमनीये किल वासुरूपधेये॥ ७॥

लतिकावपुरप्यपास्य गच्छन्त्यनुरुध्यन्नवसौरभेण कृष्टैः।
कठिने ननु सूच्यसे द्विरेफैः कलझंकारिभिरत्र निष्पतद्भिः॥ ८॥

यदि वा सुरसुन्दरी भवोर्वीमवतीर्णा यदिवोद्गता हि कन्या।
ननु मानयितव्य एव योऽहं व्यपदेशस्तव कल्मषप्रहाणे॥ ९॥

जडिमानमुपेत्य विस्मयेन क्षणमात्रं त्वदुपेक्षया स्थितं माम्।
दयिते विहितावधीरणाकं शुभवक्त्रे तव नावगन्तुमर्हम्॥ १०॥

अचिरादिह कान्तनिर्विशेषं पृषतीलोलविलोचने भवत्याः।
परिघृष्टपयोधरं भुजान्तर्मिलितायाः स्मर गूहनस्य लोले ॥ ११ ॥

नववृष्टिहतेव नीपयष्टिस्त्वदुपश्लेषविदीर्णरोमहर्षा।
न लतांग्यधुनापि पश्य पश्य त्यजति क्षोभमियं तनुर्नितान्तम् ॥ १२ ॥

तरुसंश्रयणेन दारुभूतं तव चेतो मयि निर्दयं हि मन्ये।
मलिनैरपि संस्तवाद्द्विरेफैरनुवृत्तं त्वयि विप्रलम्भदाक्ष्यम् ॥ १३ ॥

विधिनोपहतं पुरा पुनर्मां समतिक्लेश्य कृतं तवानुशोच्यम्।
अथ मत्तमतङ्गगामिनि प्रागिव मल्लोचनयोर्भवापरोक्षा ॥ १४ ॥

विलपामि लुठामि भूमिपृष्ठे प्रणिपातान्विदधामि संस्तवीमि।
बहुधाऽनुनयामि याचमानः किमु नास्त्येव तवानुवृत्त्युपायः ॥ १५ ॥

नलिनाक्षि निलीय वर्त्तिनी त्वं मम चेन्नन्दसि विप्रलम्भशोकैः।
न_तवाधिगमप्रतीक्षितां मे विफलामर्हसि कर्तुमन्ततोऽपि ॥ १६ ॥

हृदयस्थलमेतदस्त्रजालैरनतिक्लेशितमाजिषु प्रकीर्णैः।
अतितप्तमनन्यजेषुदाहैर्ननु निर्वापयितुं त्वयि प्रभुत्वम् ॥ १७ ॥

वलयेन करो हिरण्यरोचिस्तिलकेनापि मुखं मनोज्ञकान्ति।
प्रतिगात्रमुदीर्णनूत्नभासा वयसाप्युन्मदयत्यमुं वपुस्ते ॥ १८ ॥

अपरिक्षतमङ्गसौष्ठवं ते वनभूमौ जडधीरजः ससर्ज।
उपलभ्य तनुं न मोहनाङ्गि क्षममेवं पुनरत्र दुःखिता ते ॥ १९ ॥

अयि मां कठिनस्तनोपपीडं परिरभ्याशु निगूढमागतापि।
शरदिन्दुमुखि स्मरार्दितस्य प्रणयादर्पय वर्म रोमहर्षम् ॥ २० ॥

विजनं विपिनं निशा शशाङ्कस्पृहणीया मलयानिलः प्रसन्नः।
अहमस्मि पुरो निदेशवर्ती भव सुश्रोणि मयि स्वतन्त्रकामा ॥ २१ ॥

मदिराक्षि मयानुमन्यसे चेत् सकृदुन्नम्य तवाधरं निपीतम्।
अविचेयममर्त्यलौकिकं तत् सुकृतैः पण्यमिवार्जितं सुखं मे ॥ २२ ॥

सफलीकुरु कामिनि प्रसीद प्रणतेनानुसृता मया यथेच्छम्।
विहरन्त्यटवीषु वाहिनीष्वप्युपभोगक्षममाशु यौवनं ते ॥ २३ ॥

वनवर्त्मसु तन्वि मञ्जुलौ ते चरणौ वाहयितास्मि खिन्नखिन्नौ।
कुसुमापचयं कुचोन्नते त्वं कुरु शाखासु मयाऽवनामितासु ॥ २४ ॥

अपि च प्रियमण्डने भवत्या निजसंसृष्टविलासमेखलाभिः।
कलयामि परिष्क्रियां सुमध्ये कमनीयस्य नितम्बमण्डलस्य ॥ २५ ॥

जलकेलिषु सान्द्रमार्द्रवस्त्रां समभिव्यक्तनतोन्नतां शरीरे।
करभोरु वदामि लज्जमानां परिकर्षामि न निर्दयं पटान्ते ॥ २६ ॥

परिफुल्ललतानिकुंजगेहेष्वपनीते वसने मया हठेन।
पिदधत्यपि लोचने कराभ्यां परिरम्भं वत दास्यसि स्वयं मे ॥ २७ ॥

इति वनलतायां चतुर्थः सर्गः।

अथ पञ्चमः सर्गः।

एवमालपति यूनि सस्मरा रंहसा यवनिकां विधून्वती।
अस्मितस्मितमुखी तदीक्षणे सा वधूरपिदधेऽङ्गुलीदलैः ॥ १ ॥

स्विद्यदङ्गुलिगलन्मुदश्रुकं रोमहर्षपरिपोषिताङ्गकम्।
हर्षमोहरभसाविलं क्षणं जाड्यमास्त तदवस्थयोस्तयोः ॥ २ ॥

तत्र च क्वणितकङ्कणे करे दक्षिणे स परिगृह्य कामिनीम्।
साध्वसादपरिसोढयन्त्रणामाचकर्ष तरुणः स्मरार्दितः ॥ ३ ॥

पार्श्वतः परिलगन्त्यदक्षिणे क्षौममुद्वलितनीवि बिभ्रती।
तेन सा तदितरे करे धृता भुग्नपूर्ववपुरानता बभौ ॥ ४ ॥

का सुदर्शननितम्बिनि त्वमित्यामनन्तमतिलालसं ततः।
तं ननाम परिकुञ्चिताङ्गुलिस्रस्तशेखरसुमं शुचिस्मिता ॥ ५ ॥

प्रेमहर्षपरिवाहपक्ष्मलैर्ह्रीविनीतिमसृणैरपाङ्गितैः।
सा तमुत्स्तवकिताक्षमाप्नुवन्त्याददे श्रुतिसुधोत्किरां गिरम् ॥ ६ ॥

किं प्रमुह्यसि विभो पुरःस्थितामात्मनः प्रणयिनीं न बुध्यसे।
यक्ष यक्षवनितामवेहि मां हे सुदर्शन, नितम्बिनीं तव ॥ ७ ॥

नैतदद्भुतमबोधविह्वलः श्रोतुमिच्छसि कथां मयेरिताम्।
येन शापसमकालमेव ते मन्मुखेन विहितं प्रबोधनम् ॥ ८ ॥

त्वं हि चैत्ररथपालकोऽलकासीम्नि ते भवति सौधमद्भुतम्।
यत्र शङ्करजटेन्दुकान्तिभिः क्रीडतोर्न दिवसो न यामिनी ॥ ९ ॥

यक्षराडथ कदाचिदीश्वरं प्रार्थितागमनमम्बिकासखम्।
सेवितुं कृतमतिः परेद्यवि त्वां सुमोपचयने न्ययोजयत् ॥ १० ॥

आवयोरशिथिले दिनोदयेऽप्यस्मृतात्महितयोस्तु नर्मणि।
शङ्करावमतिभीरुरर्थराण्नौ शशाप कुपितः कृतागसौ ॥ ११ ॥

पादयोरथ निपत्य तत्क्षणं क्रोधमीषदपनुद्य चाश्रुभिः।
शापमोचनविधिं प्रयाचितो यद्यदापतितमद्य तद्व्यधात् ॥ १२ ॥

जन्म ते नृपकुले मलक्षयश्शङ्करस्मरणतो मया स्मृतिः।
संस्मृतं वनलतात्वमत्र मे यावदस्ति भवदङ्गसंगतिः ॥ १३ ॥

स्तोकमन्तुरबलेति चार्थराण्मह्यमत्र लतिकात्वमादिशत्।
अप्रदिष्टसुखदुःखमाहितस्वापबोधमथ ते निरीक्षणात् ॥ १४ ॥

त्वां चिरान्मनसि सञ्चितस्मरा नोत्सहे समुपलभ्य तत्क्षणम्।
गाढगूहनविधौ कृतत्वाराण्यङ्ग धारयितुमङ्गकानि मे॥ १५॥

एहि नाथ पुनरेव निर्मलौ संप्रविश्य नगरीं धनेशितुः।
रम्यचैत्ररथकुञ्जसद्मसु स्वैरमन्मथरसौ रमावहे॥ १६॥

इत्थमुत्ककलकण्ठलापिनीं कामिनीं विहितवाक्यविस्ताराम्।
आपगायितमरीचिकामिव प्रेयसीं स तृषितो व्यगाहत॥ १७॥

सद्य एव शिरसोः किलोभयोस्सोत्पलेव मधुपैरनुद्रुता।
मङ्गलार्थमनुरूपगुम्फना मालिका समपतद्दिवश्च्युता॥ १८॥

कौमुदीमभिनवेन्दुसङ्गतां पूर्वपक्ष इव वर्धयंस्ततः।
अम्बरादवततार कोऽपि तौ दम्पती धनदकिङ्करः पुरः॥ १९॥

क्लेशितोऽसि न वृथेति वक्तुमभ्युद्गतानिव च तस्य पार्श्वतः।
शङ्खपङ्कजनिधी खगात्मना मार्गविच्युतिकरौ व्यदृश्यताम्॥ २०॥ निरीक्षितौ

कांचनछविमुदारभूषणं तं प्रपूज्य वनवल्लरीपतिः।
अन्वयुङ्क्त धनदस्य शासनान्युत्सुकान्त्रिदिवमाशु गाहितुम्॥ २१॥

किङ्करस्समभिनन्दनं प्रभोस्सन्निवेद्य दुरितक्षयेऽनयोः।
व्यादिशत्स्वकनियोगपालने भूय एव विनियोजितौ च तौ॥ २२॥

अथ लघुपतनेनोत्थाय पृष्ठाद्धरित्र्या
नभसि भरिततोषस्संप्लवन्कान्तयाऽसौ।
सविधसमुपसर्पद्राजभृत्यो विरेजे
नवघन इव विद्युन्मण्डितस्सारसेन॥ २३॥

पत्त्रीपत्त्ररथे क्वचित्स्थितिजुषौ मेघैर्विमानैरिव
क्वाप्यूढौ क्वचिदैन्दवीमपि कलां नौकामिवाधिष्ठितौ।
ऋक्षाण्याशुगलीलया क्वचिदनूद्वीनौ च तौ दम्पती
व्योमाहिण्डनलाघवेन विविधां हेलामनुप्रापतुः॥ २४॥

एवं पान्थो वियति सुदृशा लीलयाऽलिङ्गिताङ्ग-
स्तस्या वामस्तनविलुलितोत्फुल्लमन्दारमालः।
तत्सल्लापश्रवणकपटेनासकृद्गण्डपालीं
तस्याश्चुम्बन् धनदनगरीं गुह्यको मन्दमागात् ॥ २५ ॥

इति वनलतायां खण्डकाव्ये पञ्चमस्सर्गः।

समाप्तश्चायं ग्रन्थः।

015,1M97,1
N55

कविमघवता किलेदं व्यरचि महालिङ्गनामधेयेन।
नानासन्दर्भमहे देवी वाङ्नानटीति यस्यान्तः ॥

इह कौतुकिनीं खलात्मनां न तु दृष्टिं प्रतिषेद्धुमस्म्यलम्।
रसभावविदां परं कृतेर्नयनाप्यायनमर्थ्यते मया ॥

इति

श्रीमदप्पय्यदीक्षितवंशीय श्रीत्यागराजाध्वरिणः
प्रपौत्रस्य श्रीयज्ञेश्वरसूनोः

महालिङ्गकवेः कृतिषु

वनलताख्यं खण्डकाव्यम्

सम्पूर्णम्।



